International Journal of Sanskrit Research 2021; 7(1): 391-394

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 391-394
© 2021 IJSR
www.anantaajournal.com
Received: 09-10-2020
Accepted: 20-12-2020

**आशिषखाँन**
शोधच्छात्र, पश्चिम वङ्ग राज्य विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

**Corresponding Author:**
**आशिषखाँन**
शोधच्छात्र, पश्चिम वङ्ग राज्य विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

# विद्यावृत्तिसम्बन्धिगतचरितनिर्माणे वैदिकोपयोग

**आशिषखाँन**

## प्रस्तावना

अखिलभूमण्डलेऽस्मिन्  समुपलब्धेषु विविधप्राचीनग्रन्थेषु वेदस्य सर्वादिमत्वमग्रगण्यञ्च सर्वैरेवाङ्गीक्रियते। वेदेषु एव भारतीया संस्कृतिः विधृता। भारतीयानां जीवनदर्शः, जीवनचर्या, कार्यकलापः, आचारविचारादिकं सामाजिकं नैतिकञ्च चरितं तथा मानवानां विविधकर्तव्यादि-निर्धारणमुपलभ्यते तत्रैव।  प्रतिनियतं समाजस्य विवर्तनद्वारा मनुष्याणां वृत्तिविषयोऽपि अनुदिनं विवर्तते। वृत्तिं विना मनुष्यस्य जीवनधारणं परिवारस्य भरणपोषणादिकञ्चासम्भव-मिति। वैदिकयुगे शिक्षकता-कृषिकार्य-पशुपालन-व्यापारादयो वृत्तयः तादृशामुत्कर्षशिखरमाप्त-वन्तो यत्तु इदानीमपि विज्ञानप्रयुक्तिनिर्भरेऽस्मिन् समाजे आदर्शत्वेन गणयितुं शक्यते।  विद्यां विना मनुष्यजीवनं व्यर्थमेव। विद्याविहीनो मानवः साक्षात् पशुरेव। विद्यालाभेन मानवो विनयशिक्षां स्वचरितशिक्षां वा लभते। तदुक्तं चाणक्येन–

"विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मस्ततः सुखम्"।।इति।

मोक्षप्राप्तिः मुक्तिलाभो वा मनुष्यजीवनस्य चरमं परमञ्च लक्ष्यम्। मोक्षलाभाय विविधा पन्थानः शास्त्रेषु उपदिष्टाः। परन्तु मोक्षलाभात् पूर्वमेव मानवेन धर्मार्थकामरूपः त्रिवर्गः समभावेन सेव्यः। धर्मार्थकामरूपत्रिवर्गस्य सेवा कथं विधेया तद्विषये शास्त्रेषु विचारितस्य धर्मार्थकामरूपत्रिवर्गसेवनस्य तथा मुक्तिलाभसहायकत्वेन विचारितानां मार्गाणां यथायथतया ज्ञानलाभो गुरुं वाचार्यं वोपाध्यायं विना नैव सम्भवेत्। तदेव प्रयोजनमङ्गीकृत्य वैदिकयुगा-दारभ्याद्यावधि विद्यादानपरम्परा अक्षुण्णैव राजते, तमेव परम्परामनुसृत्य शिक्षकतावृत्तिः आचार्यवृत्तिः गुरुवृत्तिर्वा  समाजे सर्वाधिकपवित्रवृत्तिरूपेण प्रतिष्ठामगात्। वैदिकयुगादेव वेदादिशास्त्रेषु शिक्षादानकार्ये ये तु आत्मानं नियेजितवन्तः ते तु शिक्षकाः गुरवः आचार्या उपाध्याया अध्यापका इत्यादिसंज्ञां लब्धवन्तः। ते तु समीचीनतया स्ववृत्तिं निर्वहन्ति स्म। कार्यभेदेन तेषु भिन्नत्वं परिलक्षितमभूत्।

## शिक्षक

शिक्ष्-धातोः ण्वुल्-प्रत्ययेन शिक्षक इति शब्दो निष्पन्नः। शिक्षकः क इति जिज्ञासायामुच्यते शिक्षां ददाति यः स एव शिक्षकः। आ जन्मनो जनो यस्मात् यत् किमपि शिक्षते विजानाति वा स एव शिक्षकतया मान्य इति। शिक्षकस्तु ज्ञानाञ्जनशलाकया  शिक्षार्थिनां ज्ञाननेत्रमुन्मील्य हृदयमालोकयति। शिक्षकेण छात्रहिताय छात्रज्ञानवृद्धये च सर्वदा

चिन्तनीयम्। वैदिककाले शिक्षकाः न केवलं छात्रेभ्यः पाठदानमपि च तेषां भरणपोषणादेरङ्गत्वेनान्नवस्त्रादीनां व्यवस्थामकुर्वन्। आम्नातञ्च तैत्तिरीयोपनिषदि

**आहवन्ती वितन्वाना। कुर्वाणा अचीरमात्मनः.. ……शमायन्तु ब्रह्मचारिणः स्वाहा" ।। इति।**

वैदिकयुगे परापराविद्याद्वयस्यालोचना परिलक्षिता। निरन्तराभ्यासेनैव द्वयोः विद्ययोः लोकद्वये साफल्यमाप्तुं शक्यते मानवेन, तदेव विषयो वैदिकाचार्येण स्वजीवनचर्यायां प्रदर्शितः, यथा याज्ञवल्क्यः। तथा हि केनोपनिषदि शिष्याचार्यसंवादे छात्रान् उद्दिश्याचार्येणाम्नायते -

"यन्मनसा न मनुते येनाहुर्मनोमतम्।
तदेव ब्रह्म त्वं बिद्धि नेदं यदिदमुपासते" ।।इति।

**आम्नातञ्च निरुक्ते** –

"यमेव विद्याः शुचिमप्रमत्तं मेधाविनं प्रह्मचर्योपपन्नम्।
यस्ते न द्रुह्येत् कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्"।।[1]इति

**अतः** अधिकारीनिरुपणपुरःसरमाचार्येण शिक्षकेण वा विद्यादानवृत्तिः सम्पादनीयेति वैदिकः सिद्धान्तः।

**आचार्यः-**

आपूर्वकात् चर्-धातोः ण्यत्-प्रत्ययेन आचार्य इति शब्दस्य निष्पत्तिः। यो हि आचारं ग्राहयति, छात्रोपयोगिविषयान् संगृह्णाति, छात्रबुद्धिं विकाशयति च, स ह्याचार्यः। तदुक्तं निरुक्ते –

"आचार्यः कस्मात् ? आचार्य आचारं ग्राहयति।
आचिनोत्यर्थान्। आचिनोति बुद्धिमिति वा"।।[2] इति।

अध्ययनादिब्राह्मणकर्तव्येषु अध्यापनं तु ब्राह्मणस्य प्रमुखकर्तव्यमिति। अतएव य एव ब्राह्मण उपनीय शिष्यं यज्ञविद्यासहितमुपनिषद्ग्रन्थान् अध्यापयेत् स एवाचार्यः। न केवलमेतद् अपि च छात्रेभ्यो वेदस्य पाठदानेन साकं तेन वेदस्यार्थावबोधनमपि आचार्येणाक्रियत। तथा हि उच्यतेऽभिधानकोषे- विवृणोति च मन्त्रार्थानाचार्यः सोऽभिधीयते'। इति। एवं हि उपनिषदीयज्ञानं छात्रेभ्यो दीयते येन स एव आचार्य इति। दृश्यते च याज्ञवल्क्यसंहितायाम् -

'उपनीय ददद् वेदमाचार्यः स उदाहृतः'।[3] इति। वेदज्ञ आचार्यः शिष्यस्य ब्रह्मज्ञानलाभाय सहायको भवति। तदाम्नातं-"तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति" इति।[4], आम्नातञ्च मुण्डकोपनिषदि-"परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नस्त्यकृतः कृतेन" [5] इति। "आचार्यः पुनर्वेदज्ञो भवेत्। स माणवकस्य यां जातिं साङ्गोपनयनपूर्वकसावित्र्यनुवचनेन सत्यं ज्ञानमनन्तं ब्रह्म"[6], "ब्रह्म वेद ब्रह्मैव भवति" इति।[7], "तदात्मानमेवावेदहं ब्रह्मास्मीति"[8] इत्यादिभिः श्रुतिवाक्यानुसारैः वक्तुं शक्यते यद् वेदस्यार्थावगमनेन धर्मार्थकाममोक्षरूपः पुरुषार्थलाभो सम्भवः। अतो वेदज्ञानेन मोक्षादिप्राप्तिरूपं कारणं तु आचार्य एव।

आचार्याद् शिष्यस्य पुनर्लब्धं जन्म तु श्रेष्ठमेव। मनुष्यो वारद्वयं जनिं लभते,तत्तु विद्यागतजन्म वंशगतजन्म चेति। श्रेष्ठो जन्म हि विद्यागतजन्म।तेन जन्मना मनुष्यः समाजे प्रतिष्ठां लभते। वेदज्ञाचार्येण प्रदत्तमुपनयनसंस्काररूपं यज्जन्म तत्तु कल्याणमयं भवति। उत्पादकरूपपितुः वेदाध्यापकरूपपितुः चोभयोर्मध्ये श्रेष्ठो हि वेदाध्यापकरूपपिता। यतो हि ब्रह्मजन्म उभयलोकेऽस्मिन् स्थायीभवेत्। पितरौ वंशरक्षायायेव सन्तानोत्पादनं कुरुतः। परं वेदज्ञेनाचार्येण यथाविधि उपनयनपूर्वकसावित्र्यनुवचनेन त्रैवर्णिकस्य सन्तानस्य पुनर्जन्म दीयते।इदमत्रावधेयं यत्प्रत्येकं मानवस्य कृते उत्पत्तिकुलं द्विविधं भवति। तत्रैकं कुलं जन्मना जायते, अपरं तु विद्यया जायते। विद्याजातं कुलमेव शास्त्रेषु वर्णितम्। पाणिनिना च सूत्रितं- 'वंशो द्विधा विद्यया जन्मना च ' इति। एतज् जन्म सत्यमजरमरञ्चेचि। तदुक्तं भगवत्या मनुना -

"आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः।
उत्पादयति सावित्र्या सा सत्या साऽजरामरा "।।[9] इति।

आचार्यो हि वेदान्तवर्णितस्य ब्रह्मणः परमात्मनो वा मूर्तिः। पिता हिरण्यगर्भस्य, माता च धारणात् पृथिवीमूर्तिः, भ्राता च स्वमूर्तिः। तस्मादेव देवरूपा एते नावमन्तव्याः। अतो देवतारूपेण ते पूजनीया उपास्या अनुसरणार्हाश्च। यस्तु वेदचर्चायां निविष्टः, धर्मविषये निष्णातः, सद्वंशजः, नित्यवेदाध्यायी,कायमनोवाक्यैः पवित्ररूपः, स्ववेदशाखायां निपुणः, आलस्यहीनः, कर्मरतः ब्राह्मणः स एवाचार्यो भवेत्। तदुक्तं व्यासस्मृतौ –

1 निरुक्तस्य द्वितीयाध्यायस्य चतुर्थपरिच्छेदे

3याज्ञवल्क्यसंहितायाम् आचारोऽध्याये ३४

4वृहदारण्यकोपनिषदि४४.२२.

5मुण्डकोपनिषदि १२.१२.

6तैत्तिरीयोपनषदि २११.

7मुण्डकोपनिषदि ३२.९.

8वृहदारण्यकोपनिषदि१४.१०.

9मनुस्मृतौ२१४८.

"वेदैकनिष्टं धर्मज्ञं कुलीनं श्रोत्रियं शुचिम्।
स्वशाखाज्ञमनालस्यं विप्रं कर्तारमीप्सेत्"।। इति।

**उपाध्यायः-**

उपपूर्वकात् अधिपूर्वकात् इञ्-धातो घञ्-प्रत्ययेनोपाध्याय शब्दो निष्पन्नः। वेदस्यैकदेशेन मन्त्रभागेन ब्राह्मणभेन वा सह वेदरहितानि व्याकरणादीन्यङ्गानि यो वृत्त्यर्थमध्यापयति स उपाध्याय उच्यते। 'मन्त्रब्राह्मणयोर्वेदनामधेयमि'त्यापस्तम्बमतानुसारं मन्त्रब्राह्मणयोर्मध्ये यस्य कस्यापि एकस्य पाठदानं करोति यः स एवोपाध्यायः। एवञ्च वेदानां सम्यग्वबोधनार्थं तत्स्वराद्यवगमनार्थं तद्विनियोगज्ञानार्थं च शिक्षाकल्पादिवेदाङ्गानां महत्त्वपूर्णं स्थानमस्ति। विना वेदाङ्गज्ञानं वेदज्ञानमसम्पूर्णं स्यात्। वस्तुतस्तु षड् वेदाङ्गानि यः छात्रान् पाठयति स एवोपाध्यायः। उपाध्यायस्तु पाठदानेन एव जीविकार्जनं करोति। अत उच्यते मनुना-

"एकदेशं तु वेदस्य वेदाङ्गानि वा पुनः।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते"[10]।। इति।

**दृश्यते च याज्ञवल्क्यसंहितायाम् –**

'एकदेशमुपाध्याय ऋत्विग् यज्ञकृदुच्यते'।[11] इति।

**गुरुः-**

गृधातोः कुप्रत्ययेन गुरुरिति शब्दो निष्पद्यते।गकारस्यार्थः सिद्धिदाता, रेफस्यार्थः पापहारकः, उकारार्थः शिव इति , त्रितयात्मकोऽयं गुरुः सर्वश्रेष्ठः। अथवा गकारार्थः ज्ञानसम्पत्तिः, रेफकारस्यार्थः पापदाहकः, उकारस्यार्थः शिवस्वरूपत्वप्रदः। एवञ्च गुशब्दस्यार्थोऽन्धकारः रुशब्दार्थः तन्निवारक इति। तदुक्तं तन्त्रार्णवे –

"गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः।
उकारः शम्भुरित्युक्तस्त्रितयात्मा गुरुः परः।।
अन्धकारनिरोधित्वाद् गुरुरित्यभिधीयते"।।[12]इति।

'सह नौ यशः। सह नौ ब्रह्मवर्चसम्' इत्यादिना वचनेन निर्दिश्यते यद् गुरोः आशीर्वादेन शिष्यस्य यशो बर्धते। तेजस्विभिः छात्रैः च गुरोः यशः प्रथते। गुरुशिष्ययोः उभयोरेव सामञ्जस्येन सद्भावेन च उभयोः तेजोबृद्धिः सञ्जायते। तथोच्यते –

"आचार्यः पूर्वरूपम्। अन्तेवासी उत्तररूपम्।
विद्या सन्धिः। प्रवचनं सन्धानम्"।।[13] इति

विद्याग्रहणात् परं विनयसूचकवाक्येन यः अकृतज्ञः शिष्यः गुरुं न सम्मानयति, कर्मणा च नैव पूजयति, तादृशं शिष्यं गुरुः कदापि न प्रतिपालयेत्। तदुक्तं निरुक्ते-

"अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा।
यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत्" ।।[14]इति

गुरुशिष्ययोः परम्परारक्षायै उपगुरुं शिष्य उपदेशं गृह्णीयात्। एवञ्चोपदेशप्रदाने निरलसो भवेत् गुरुः। तथा हि दृश्यते तैत्तिरीयारण्यकस्य(८.१.१) भाष्ये सायणाचार्येण प्रोक्तम्- "यथा गुरुर्निरालस्य उपदिशति यथा चाहमुपदिष्टमर्थमप्रतिपत्तिविप्रतिपत्तिरहितो गृह्णामि तथा रक्षणमुपदेशकाले प्रार्थ्यते।सह नौ यशः। सह नौ ब्रह्मवर्चसमि"त्यनेन ज्ञायते यद् गुरोः आशिषा शिष्यस्य यशः प्राप्तिः, तेजस्विभिः छात्रैः च गुरोः यशोबृद्ध प्रथते। गुरुशिष्ययोः द्वयोरेव सामञ्जस्येन सद्भावेन च द्वयोरपि तेजोबृद्धिः घटते।

गुरुशिष्ययोः परम्परारक्षायै उपगुरुं शिष्य उपदेशं गृह्णीयात्। एवञ्चोपदेशप्रदाने निरलसो भवेत् गुरुः। तथा हि दृश्यते तैत्तिरीयारण्यकस्य (८.१.१) भाष्ये सायणाचार्येण प्रोक्तम्-
"यथा गुरुर्निरालस्य उपदिशति यथा चाहमुपदिष्टमर्थमप्रतिपत्तिविप्रतिपत्तिरहितो गृह्णामि तथा रक्षणमुपदेशकाले प्रार्थ्यते।सह नौ यशः। सह नौ ब्रह्मवर्चसमि"त्यनेन ज्ञायते यद् गुरोः आशिषा शिष्यस्य यशः प्राप्तिः, तेजस्विभिः छात्रैः च गुरोः यशोबृद्ध प्रथते। गुरुशिष्ययोः द्वयोरेव सामञ्जस्येन सद्भावेन च द्वयोरपि तेजोबृद्धिः घटते।

**ग्रन्थसूची**

1. तैत्तिरीयारण्यकम्(भट्टभास्करभाष्योपेतम्), ए.महादेवशास्त्रिणा के.रङ्गाचार्येण च सम्पादितम् (खण्डत्रयम्), प्रकाशकः-मोतिलाल-बानारसी-दास, दिल्ली, प्रथमसंस्करणनम्-1985.
2. भर्तहरिः, वाक्यपदीयम्, श्रीसूर्यनारायणशुक्लेन शास्त्रदीपव्याख्यानेन टिप्पनेन च समलङ्कृतम्, श्रीगोविन्दशुक्लेन सम्पादितम्,

10 मनुस्मृतौ2-141

11याज्ञवल्क्यसंहितायाम् आचारोऽध्याये३५

12तन्त्रसारे १४८-४९.

13तैत्तिरीयोपनिषदि१३..३

14निरुक्तस्य द्वितीयाध्यायस्य चतुर्थपरिच्छेदे ३

काशीसंस्कृतग्रन्थमाला 124, प्रकाशकः-चौखाम्बा-संस्कृत-सीरिज-आफिस, द्वितीयसंस्करणम्, वाराणसी, 2018(संवत्)।
3. मनुः,मनुस्मृतिः (नवटीकोपेता), सम्पादकः- जे.एङ्च्.दाभे, प्रकाशकः-निर्णयसागरः-प्रस्,बोम्बाई, प्रथमसंस्करणम्-1972, महाराष्ट्रप्रदेशः।
4. महर्षिः याज्ञवल्क्यः, याज्ञवल्क्यशिक्षा, सम्पादकः-ड.नरेश झा, प्रकाशकः-चौखाम्बा-सुरभारती-प्रकाशनम्, वाराणसी, उत्तरप्रदेशः, संस्करणम्-2009।
5. यास्कः, निरुक्तम् (व्रजजीवन-प्राच्यभारती-ग्रन्थमाला), कश्यपप्रजापतिकृतनिघण्टुभाष्यरूपं दुर्गाचार्यकृत-ऋज्वर्थाख्यव्यानुसारी च, मुकुन्द-झा-शर्मणा कृतया निरुक्तविवृत्या टिप्पण्यादिभिः समुपेतं सम्पादितं संशोधितञ्च, प्रकाशकः- चौखाम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली, पुनर्मुद्रितसंस्करणम्-2008।
6. उपनिषद्ग्रन्थाः प्रकाशकः- गोलपार्करामकृष्णमिषणः, कोलकाता।